# 55 - कालिय मर्दनं

अथ वारिणि घोरतरं फणिनं प्रतिवारयितुं कृतधीर् भगवन् ।
द्रुत मारिथ तीरग नीप तरुं विष मारुत शोषित पर्ण चयम् ॥॥55-1॥

अधिरुह्य पदाम्बुरुहेण च तं नव पल्लव तुल्य मनोज्ञ रुचा ।
ह्रद वारिणि दूरतरं न्यपतः परिघूर्णित घोर तरङ्ग गणे ॥ ॥55-2॥

भुवनत्रय भारभृतो भवतो गुरुभार विकम्पि विजृम्भि जला ।
परिमज्जयति स्म धनुश् शतकं तटिनी झटिति स्फुट घोषवती ॥॥55-3॥

अथ दिक्षु विदिक्षु परिक्षुभित भ्रमितो दरवारि निनाद भरैः ।
उदका दुदगात् उरगाधिपतिः त्वदुपान्त मशान्त रुषाऽन्धमनाः ॥॥55-4॥

फण शृङ्ग सहस्र विनिस् सृमर ज्वल दग्नि कणोग्र विषाम्बुधरम् ।
पुरतः फणिनं समलोकयथा बहु शृङ्गिण मञ्जन शैल मिव ॥ ॥55-5॥

ज्वल दक्षि परिक्षर दुग्र विष श्वसनोष्म भरस् स महा भुजगः ।
परिदश्य भवन्त मनन्त बलं समवेष्टयत् अस्फुट चेष्ट महो ॥॥55-6॥

अविलोक्य भवन्त मथाकुलिते तट गामिनि बालक धेनुगणे ।
व्रज गेह तलेऽप्य निमित्त शतं समुदीक्ष्य गता यमुनां पशुपाः ॥॥55-7॥

अखिलेषु विभो भवदीय दशाम् अवलोक्य जिहासुषु जीवभरम् ।
फणि बन्धन माशु विमुच्य जवात् उदगम्यत हासजुषा भवता ॥॥55-8॥

अधिरुह्य ततः फणि राज फणान् ननृते भवता मृदु पाद रुचा ।
कलशिञ्जित नूपुर मञ्जुमिलत् कर कङ्कण सङ्कुल सङ्क्वणितम् ॥॥55-9॥

जहृषुः पशु पास् तुतुषुर् मुनयः ववृषुः कुसुमानि सुरेन्द्र गणाः ।
त्वयि नृत्यति मारुत गेह पते परिपाहि स मां त्वमदान्त गदात् ॥॥55-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥